2019

Sanskrit (Hons.) Semester-II

paper - CC3 5 Marks

## টীকা/ভাবসম্প্রসারণ/তাৎপর্যব্যাখ্যা/ব্যাখ্যা

① ব্যাকরণম্ বা মুখম্ ব্যাকরণম্ স্মৃতম্।
বা প্রধানম্ ষট্‌স্বঙ্গেষু ব্যাকরণমিতি।
বা ব্যাকরণস্য প্রয়োজনম্ চ।

বেদানাম্ অঙ্গম্ বেদাঙ্গম্। বৈদিকমন্ত্রানাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্ত্তিনি যুগে বেদাঙ্গসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গম্ ষড়্‌বিধম্। মহর্ষিঃ পতঞ্জলিঃ বেদাঙ্গানাং ব্যাকরণম্ উক্তবান্ —
"প্রধানম্ ষট্‌স্বঙ্গেষু ব্যাকরণমিতি।"
অর্থাৎ বেদানাং রক্ষণায় ব্যাকরণজ্ঞানম্ আবশ্যকম্।
মুণ্ডকোপনিষদি উক্তম্ —
"শিক্ষা কল্পো ব্যাকরণম্ নিরুক্তম্ ছন্দো জ্যোতিষমিতি।"
পাণিনীয়শিক্ষায়াং উক্তম্ —
"শিক্ষা ঘ্রাণং তু বেদস্য মুখং ব্যাকরণম্ স্মৃতম্।"
ব্যাকরণস্য প্রয়োজনম্ বার্তিকে উক্তম্ —
"রক্ষোহাগমলঘ্বসন্দেহাঃ প্রয়োজনম্।"
অর্থাৎ রক্ষা, উহঃ, আগমঃ, লঘুঃ, অসন্দেহঃ - ইতি ব্যাকরণস্য মুখ্যপ্রয়োজনানি।

② নিরুক্তম্ বা নিরুক্তম্ শ্রোত্রমুচ্যতে।
বা

বেদানাম্ অঙ্গম্ বেদাঙ্গম্, বৈদিকমন্ত্রানাম্ অর্থাবোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্ত্তিনি যুগে বেদাঙ্গসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গম্ ষড়্‌বিধম্। মুণ্ডকোপনিষদি উক্তম্ —
"শিক্ষা কল্পো ব্যাকরণম্ নিরুক্তম্ ছন্দো জ্যোতিষমিতি।"



Scanned with CamScanner

পানিনীয়শিক্ষায়াং উক্তম্ —

" জ্যোতিষাময়নং চক্ষুর্নিরুক্তং শ্রোত্রমুচ্যতে," অর্থাৎ নিরুক্তম্ বেদপুরুষস্য শ্রোত্রত্বেন কল্পিতম্। নিরুক্তম্ আচার্যযাস্কেন রচিতম্। নিরুক্তগ্রন্থস্য ত্রয়ঃ বিভাগাঃ বর্তন্তে — নৈঘন্টুককাণ্ডম্, নৈগমকাণ্ডম্, ~~[illegible]~~ দৈবতকাণ্ডম্ চ ইতি।

③ শিক্ষা বা শিক্ষা ঘ্রাণং তু বেদস্য

বেদানাম্ অঙ্গম্ ..... জ্যোতিষমিতি"

পানিনীয়শিক্ষায়াং উক্তম্ —

" শিক্ষা ঘ্রাণং তু বেদস্য।" অর্থাৎ শিক্ষা বেদপুরুষস্য ঘ্রাণত্বেন কল্পিতম্। যস্মিন্ বেদাঙ্গে বর্ণস্বরমাত্রাদীনাং যথাযথম্ উচ্চারণম্ প্রয়োগবিধিশ্চ উল্লিখিতঃ তৎ শিক্ষাবেদাঙ্গম্। আধুনিকধ্বনিবিজ্ঞানস্য উৎসঃ ভবতি শিক্ষাবেদাঙ্গম্।

বর্ণ - স্বর - মাত্রা - বল - সাম - ইত্যেতানি বিষয়ানি আলোচিতানি শিক্ষাবেদাঙ্গে। ঋগ্বেদস্য ঋক্প্রাতিশাখ্যম্ বৃহদ্দেবতা।

④ সর্বানুক্রমণী

বেদানাম্ অঙ্গম্ বেদাঙ্গম্, বৈদিকমন্ত্রানাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষনায় চ বেদপরবর্তিনি যুগে বেদাঙ্গসাহিত্যস্য সৃষ্টিঃ। তথৈব বেদাঙ্গসাহিত্যস্য সমসাময়িককালে বেদাঙ্গম্ ইব বেদো উপাঙ্গসাহিত্যম্ অপি রচিতম্ জাতম্। সর্বানুক্রমণী তাদৃশম্ উপাঙ্গসাহিত্যম্। শিক্ষাবেদাঙ্গস্য অনুসারী গ্রন্থঃ সর্বানুক্রমণী।

Scanned with CamScanner

মহর্ষিঃ কাত্যায়নঃ সর্বানুক্রমনী গ্রন্থস্য রচয়িতা। সর্বানুক্রমনীগ্রন্থে ঋগ্বেদীয়মন্ত্রানাম্ অকারাদিক্রমেন বর্নক্রমঃ উপাদিষ্টঃ। ইত্যেবং ঋষিছন্দদেবতানাং ক্রমোঽপি।

## (5) বৃহদ্দেবতা

বেদানাম্ অঙ্গম্ বেদাঙ্গম্। ষট্বেদাঙ্গেষু অন্যতমম্ শিক্ষাবেদাঙ্গম্। বৃহদ্দেবতা শিক্ষাবেদাঙ্গস্য অনুসারী গ্রন্থঃ। শিক্ষা বেদাঙ্গম্, 'বৃহদ্দেবতা' উপাঙ্গম্। আচার্যঃ শৌনকঃ বৃহদ্দেবতায়াঃ রচয়িতা।

বৃহদ্দেবতাগ্রন্থে ঋগ্বেদীয়সূক্তানাং দেবতা-ঋষি-ছন্দসাম্ উল্লেখঃ দৃশ্যতে। বেদমন্ত্রানাং পঠনে পাঠনে চ ঋষি-ছন্দ-দেবতা-বিনিয়োগ-বিষয়কং জ্ঞানম্ আবশ্যকম্। বৃহদ্দেবতায়াঃ বহুনাম্ আখ্যানোপাখ্যানানাং উল্লেখঃ মহাভারতেঽপি দৃশ্যতে।

## (6) গীতা বা শ্রীমদ্ভগবদ্গীতা

মহাভারতস্য ভীষ্মপর্বনি পাণ্ডবসেনাপতিম্ অর্জুনং যুদ্ধার্থে পুনঃ নিয়োজয়িতুম্ অবতারপুরুষেণ শ্রীকৃষ্ণেন প্রদত্তঃ উপদেশঃ গীতা তথা শ্রীমদ্ভগবদ্গীতা ইতি খ্যাতা। অষ্টাদশাধ্যায়েষু সপ্তশতশ্লোকাত্মিকা গীতা।

গীতা উপনিষদ্ সারভূতা। পদ্মনাভস্য ভগবতঃ বিষ্ণোঃ মুখনিঃসৃতা গীতা — "যা স্বয়ং পদ্মনাভস্য মুখপদ্মাদ্ বিনিঃসৃতা।" অয়ং ভারতীয়জাতীয়জীবনে সর্বাধিকং মর্যাদাপ্রাপ্তঃ গ্রন্থঃ। ভগবতা শ্রীকৃষ্ণেন অর্জুনং প্রতি উক্তম্ — "কর্মণ্যেবাধিকারস্তে মা ফলেষু কদাচন।" গীতায়াঃ কর্মদর্শনস্য সমর্থনং ঈশোপনিষদি অপি প্রাপ্যতে — "কুর্বন্নেবেহ কর্মাণি জিজীবিষেচ্ছতং সমাঃ।" সর্বাত্মমার্গে গীতা সর্বজনানাং পথপ্রদর্শিকা। বেদানুদর্শনস্য অন্যতমা ভিত্তিঃ শ্রীমদ্ভগবদ্গীতা॥



Scanned with CamScanner

(7) <u>হরিবংশম্ বা খিলকাণ্ডম্</u>

মহাভারতস্য খিলকাণ্ডে তথা পরিশিষ্টপর্বণি
হরিবংশস্য অবস্থানম্। হরিবংশ - বিষ্ণু - ভবিষ্যৎপর্বত্রিযুক্তং
দ্বাদশ সহস্রশ্লোকৈর্যুক্তং হরিবংশম্।
হরিবংশে ভগবতঃ শ্রীকৃষ্ণস্য বাল্যলীলা, তস্য
কর্মজীবনম্ অন্তিমলীলা চ বেদব্যাস কবিনা বর্ণিতা।
হরিবংশম্ হরিবংশপুরাণম্ ইতি পরিচিতম্।
হরিবংশস্য প্রথমে পর্বণি বিশ্বচরাচরস্য সৃষ্টি-
স্থিতিলয়কাহিনী বর্ণিতা। দ্বিতীয়ে তথা বিষ্ণুপর্বণি
ভগবতঃ বিষ্ণোঃ সম্পূর্ণম্ জীবনচরিতম্ আলোচিতম্।
তৃতীয়ে তথা ভবিষ্যপর্বণি ~~[illegible]~~ মন্বন্তরাদিবর্ণনৈঃ
ভগবতঃ অবতারলীলাপি পর্যালোচিতা।

---

(8) <u>রামায়ণস্য কাণ্ডসংখ্যা</u>

রামায়ণস্য রচয়িতা মহর্ষিঃ বাল্মীকিঃ।
রামায়ণে সপ্ত (7) কাণ্ডানি সন্তি। রামায়ণে
চতুর্বিংশতিসহস্রং (24,000) শ্লোকাঃ সন্তি, সপ্ত
কাণ্ডানি নামানি যথা - বালকাণ্ডম্ (আদিকাণ্ডম্),
অযোধ্যাকাণ্ডম্, অরণ্যকাণ্ডম্, কিষ্কিন্ধ্যাকাণ্ডম্,
সুন্দরকাণ্ডম্, লঙ্কাকাণ্ডম্ (যুদ্ধকাণ্ডম্), উত্তরকাণ্ডম্
চ। রামায়ণে প্রক্ষিপ্তকাণ্ডম্ দ্বয়ম্ অস্তি, তে
যথা - বালকাণ্ডম্ উত্তরকাণ্ডম্ চ।
[আদিকালে অযোধ্যা অরণ্যে কিষ্কিন্ধ্যার সুন্দর লঙ্কার
উত্তরাদিকে বাস করত।]

(9) <u>মহাভারতস্য পর্বসংখ্যা</u>

মহাভারতস্য রচয়িতা কৃষ্ণদ্বৈপায়নঃ (বেদব্যাসঃ)।
মহাভারতে শতসহস্রং (1,00000) শ্লোকাঃ সন্তি।
মহাভারতস্য অপরনাম - জয়কাব্যম্, ভারতকাব্যম্,
মহাভারতম্, শতসাহস্রীসংহিতা চ ইত্যাদি



Scanned with CamScanner

নাম্না পরিচিতম্। ম

মহাভারতে অষ্টাদশ পর্বাণি বিদ্যন্তে। যথা - আদিপর্বম্, সভাপর্বম্, বনপর্বম্, বিরাটপর্বম্, উদ্যোগপর্বম্, ভীষ্মপর্বম্, দ্রোণপর্বম্, কর্ণপর্বম্, শল্যপর্বম্, সৌপ্তিকপর্বম্, স্ত্রীপর্বম্, শান্তিপর্বম্, অনুশাসনপর্বম্, অশ্বমেধপর্বম্, আশ্রমিকপর্বম্, মৌষলপর্বম্, মহাপ্রস্থানিকপর্বম্, স্বর্গারোহনপর্বম্ চ।

Short question

(i) 'মহাভারতম্' কতি বর্ষৈঃ বেদব্যাসেন রচিতম্?

উঃ => ত্রিভিঃ (তিন বছর) বর্ষৈঃ।

(ii) 'ধর্মসংবাদঃ' ই গ্রন্থঃ কঃ ভবতি?

উঃ => মহাভারতম্

(iii) 'ধর্মসংবাদঃ' ইত্যস্য অর্থঃ কঃ?

উঃ => মহাভারতস্য ত্রয়ঃ বক্তারঃ, যথা (ক) শ্রীকৃষ্ণদ্বৈপায়ন বেদব্যাসঃ (খ) মহর্ষিঃ বৈশম্পায়নঃ (গ) মহর্ষিঃ লোমহর্ষনঃ চ। মহাভারতস্য ত্রয়ঃ শ্রোতারঃ, যথা- (ক) মহর্ষিঃ বৈশম্পায়নঃ (খ) রাজা জনমেজয়ঃ (গ) শৌনকাদয়ঃ চ।

(iv) ব্যাসভারতস্য/মহাভারতস্য লিপিকারঃ কঃ ভবতি?

উঃ => গণপতিঃ গণেশঃ।

(v) মহাভারতসম্বন্ধিতঃ ব্যাসস্য সিদ্ধান্তঃ কোঽস্তি?

উঃ => "ধর্মে চার্থে চ কামে চ মোক্ষে চ ভরতর্ষভঃ।
যদিহাস্তি তদন্যত্র যন্নেহাস্তি ন তৎ কুত্রচিৎ॥"

(vi) মহাভারতরচনায়াঃ কতি স্তরাণি সন্তি?

ত্রীণি স্তরাণি সন্তি, যথা- ① সৌতি স্তরম্ ② ব্রাহ্মণস্তরম্ ③ জয়নবৌদ্ধস্তরম্ ইতি।

(vii) মহাভারতে কঃ রাজবংশঃ বর্ণিতঃ? => কুরুবংশঃ.

## (২৬) (10) পুরাণস্য সংখ্যা

-পুরাণস্য রচয়িতা কৃষ্ণদ্বৈপায়নঃ বেদব্যাসঃ। পুরাণস্য ভাগদ্বয়ং অস্তি, যথা - মহাপুরাণম্ উপপুরাণম্ চ ইতি।

মহাপুরাণানি অষ্টাদশসংখ্যকানি, যথা -

[মদ্বয়ং ভদ্বয়ং চৈব ব্রত্রয়ং বচতুষ্টয়ম্।
অনাপলিঙ্গং কূস্কানি পুরাণানি অষ্টাদশঃ॥]

(1) মৎস্যপুরাণং (2) মার্কণ্ডেয়পুরাণম্ (3) ভাগবতপুরাণম্
(4) ভবিষ্যপুরাণং (5) ব্রহ্মপুরাণম্ (6) ব্রহ্মাণ্ডপুরাণম্
(7) ব্রহ্মবৈবর্তপুরাণং (8) বায়ুপুরাণম্ বা শৈবপুরাণম্
(9) বামনপুরাণম্ (10) বরাহপুরাণম্ (11) বিষ্ণুপুরাণম্
(12) অগ্নিপুরাণম্ (13) নারদপুরাণম্ (14) পদ্মপুরাণম্
(15) লিঙ্গপুরাণম্ (16) গরুড়পুরাণম্ (17) কূর্মপুরাণম্
(18) স্কন্দপুরাণম্ চ ইতি।

উপপুরাণানি অষ্টাদশসংখ্যকানি (18), যথা -

(1) সনৎপুরাণম্ (2) নরসিংহপুরাণম্ (3) বায়ুপুরাণম্
(4) শিবধর্মপুরাণম্ (5) আশ্চর্যপুরাণম্ (6) নারদপুরাণম্
(7) নন্দিকেশ্বরপুরাণম্ (8) উশনসপুরাণম্ (9) কপিলপুরাণম্
(10) বরুণপুরাণম্ (11) শাম্বপুরাণম্ (12) কালিকাপুরাণম্
(13) মহেশ্বরপুরাণম্ (14) কল্কিপুরাণম্ (15) দেবীপুরাণম্
(16) পরাশরপুরাণম্ (17) মরীচপুরাণম্ (18) সূর্যপুরাণম্
বা ভাস্করপুরাণম্ চ ইতি।

---

Scanned with CamScanner

(11) অগ্নিপুরাণম্ - অষ্টাদশমহাপুরাণেষু অন্যতমম্

অগ্নিপুরাণম্। ভগবতঃ শিবশঙ্করস্য মাহাত্ম্যসূচকং পুরাণম্ অগ্নিপুরাণম্। অগ্নিপুরাণম্ আগ্নেয়পুরাণম্ বহ্নিপুরাণম্ ইতি অপি পরিচিতম্। ইদমপি অন্যতমম্ প্রাচীন-পুরাণম্। ষোড়শসহস্রাত্মকৈঃ শ্লোকৈঃ পুরাণমিদং রচিতম্।

অগ্নিপুরাণে রামায়ণ-মহাভারতাদীনাং বিবিধানাং স্মৃতিশাস্ত্রানাং শিক্ষা গৃহীতা জাতা। ভগবত-কূর্ম-বায়ু-মার্কণ্ডেয়পুরাণানাং বিবিধবিষয়ঃ অত্র পর্যালোচিতঃ, বঙ্গীয়নৃপতিপ্রবরেন বল্লালসেনেন অগ্নিপুরাণস্য ভাষ্যং বিরচিতম্।

(12) মৎস্যপুরাণম্

~~অষ্টাদশ~~ অষ্টাদশঃ মহাপুরাণেষু ~~অন্য~~ অন্যতমম্ মৎস্যপুরাণম্। ভগবতঃ বিষ্ণোঃ মাহাত্ম্যসূচকং মৎস্যপুরাণম্ 290 অধ্যায়েষু চতুর্দশসহস্রশ্লোকৈঃ (14000) রচিতঃ গ্রন্থঃ অয়ম্ ~~মৎ~~ মৎস্যপুরাণম্।

ভগবতা বিষ্ণুনা মৎস্যাবতাররূপেন প্রথমমানবস্য মনোঃ রক্ষনকাহিনী মৎস্যপুরাণে আলোচিতা। শতপথব্রাহ্মনস্য মনুমৎস্যকথা অস্য পুরাণস্য উৎসরূপেন কল্পিতা ভবতি।

তীর্থমাহাত্ম্য দেবালয়প্রতিষ্ঠা - বর্ণাশ্রমবিধি-দানধর্মবিধি - ত্রিপুরাসুরবধ - পার্বত্যাঃ হিমালয়দুহিতা চ মৎস্যপুরাণস্য অন্যতমঃ আলোচ্যঃ বিষয়ঃ।

(13) বিষ্ণুপুরাণম্

অষ্টাদশমহাপুরাণেষু অন্যতমম্ বিষ্ণুপুরাণম্। ভগবতঃ বিষ্ণোঃ মাহাত্ম্যসূচকম্ পুরাণম্ বিষ্ণুপুরাণম্।



Scanned with CamScanner

মহর্ষিবশিষ্ঠস্য পুত্রঃ মহর্ষিঃ পরাশরঃ বিষ্ণুপুরাণস্য প্রবক্তা, বিষ্ণুপুরাণম্ বৈষ্ণবধর্মাবলম্বীনাম্ সর্বাধিকঃ প্রামাণ্যগ্রন্থত্বেন স্বীকৃতঃ।

অস্মিন পুরাণে বর্ণনীয়বিষয়েন সহ বিষ্ণুপাসনাপদ্ধতিঃ, বিবিধানি বৈষ্ণবতীর্থানি, বৈষ্ণবধর্মীয়াচারানুষ্ঠানানি বর্ণিতানি সন্তি। জম্বুদ্বীপান্তর্গতাঃ সপ্তবর্ষাঃ অত্র বর্ণিতাঃ।

---

## (14) অষ্টাধ্যায়ী - পাণিনি

মহর্ষিনা ~~পাণিনি~~ পাণিনিনা বিরচিতঃ অষ্টাধ্যায়ী ইতি ব্যাকরনগ্রন্থঃ। অষ্টাধ্যায়ী অষ্টাধ্যায়েষু বিভক্তাঃ। অষ্টাধ্যায়েষু 32 পাদাঃ, 3996 সূত্রানি অত্র বিদ্যন্তে। অষ্টাধ্যায়ী রচয়িতা মহর্ষিঃ পাণিনিঃ প্রাচীনগান্ধারপ্রদেশস্য উদ্ভাণ্ডপুরস্য অধিবাসী ইতি নন্দাং হতঃ অভবৎ।

চতুর্দশমাহেশ্বরসূত্রানি আশ্রিত্য অষ্টাধ্যায়ী বিরচিতা, অয়ং গ্রন্থঃ সূত্রাকারেণ রচিতঃ। সম্পূর্ণতঃ বৈজ্ঞানিকপদ্ধত্যা অষ্টাধ্যায়ী কল্পিতা। বৈদিকসংস্কৃতস্য লৌকিকসংস্কৃতস্য চ নিয়মবিধিঃ ব্যবহারবিধিঃ চ ~~অষ্টাধ্যায়ে~~ অষ্টাধ্যায়ীগ্রন্থে বিহিতা। অষ্টাধ্যায়ী ব্যাকরনশাস্ত্রস্য অন্যতমঃ মহাগ্রন্থঃ।

---

## (15) মহাভাষ্যম্ - পতঞ্জলি

মহর্ষিনা ~~পতঞ্জলি~~ পতঞ্জলিনা বিরচিতঃ মহাভাষ্যম্ ইতি ব্যাকরনগ্রন্থঃ। পাণিনিকৃতস্য অষ্টাধ্যায়ীগ্রন্থস্য ভাষ্যং মহাভাষ্যম্। মহাভারতমিব আকারে মহত্ত্বে মহত্ত্বাৎ পতঞ্জলিকৃতঃ গ্রন্থঃ মহাভাষ্যমিতি খ্যাতঃ। মহাভাষ্যং 84 আহ্নিকে কল্পিতম্।



Scanned with CamScanner

মহর্ষিঃ পতঞ্জলিঃ মহাভাষ্যগ্রন্থে আত্মানং 'গোনর্দীয়ঃ' ইতি উল্লিখিতবান্। গোনর্দঃ ইতি স্থানে পতঞ্জলেঃ নিবাসঃ আসীৎ। সঃ গোণিকাপুত্রঃ ইতি চ খ্যাতঃ। মহাভাষ্যম্ ব্যাকরণশাস্ত্রস্য অন্যতমঃ মহাগ্রন্থঃ।

---

**ভারতীয় দর্শন**

(16) সৎকার্যবাদঃ (সাংখ্যদর্শন)

~~ভারতীয়দর্শনে~~

বা "অসদকরণাদুপাদানগ্রহণাৎ সর্বসম্ভবাভাবাৎ।
শক্তস্য শক্যকরণাৎ কারণভাবাচ্চ সৎকার্যম্॥"

ভারতীয়দর্শনে কার্যকারণবাদঃ বহুলতয়া চর্চিতো বিষয়ো ভবতি। সাংখ্যৈঃ সৎকার্যবাদঃ স্বীকৃতঃ। তস্য মতে কার্যম্ উৎপত্তেঃ পূর্বং কারণে ক্রিয়মানং তিষ্ঠতি, কারণম্ যৎ অস্য, তস্মাৎ ক্রিয়াপি ন উৎপদ্যতে। বাচস্পতিপ্রদত্তস্য সৎকার্যবাদস্য কতিচিৎ যুক্তয়ঃ—

"অসদকরণাদুপাদানগ্রহণাৎ সর্বসম্ভবাভাবাৎ।
শক্তস্য শক্যকরণাৎ কারণভাবাচ্চ সৎকার্যম্॥"

অর্থাৎ অসদকরণাৎ, উপাদানগ্রহণাৎ, সর্বসম্ভবাভাবাৎ, শক্তস্য শক্যকরণাৎ, কারণভাবাৎ + অয়মেব সাংখ্যস্বীকৃতঃ সৎকার্যবাদঃ

(17) অষ্টাঙ্গযোগঃ (যোগদর্শন)

বা "যমনিয়মাসনপ্রাণায়ামপ্রত্যাহারধারণাধ্যানসমাধয়ঃ।"

যোগদর্শনানুসারেণ পুরুষস্য প্রকৃতেশ্চ বিবেকজ্ঞানং যোগেনৈব সম্ভবতি। প্রকৃতিপুরুষয়োঃ বিবেকজ্ঞানম্ এব কৈবল্যম্ মুক্তিঃ বা। বিবেকজ্ঞানলাভায়



Scanned with CamScanner

চিত্তশুদ্ধিঃ প্রয়োজনং চিত্তশুদ্ধ্যর্থং চ অষ্টাঙ্গযোগস্য প্রয়োজনং ভবতি। তানি চ ~~অষ্টানি~~ অষ্টযোগাঙ্গানি ভবন্তি –
"যমনিয়মাসনপ্রাণায়ামপ্রত্যাহারধারণাধ্যানসমাধয়ঃ" ইতি। অর্থাৎ যমঃ - নিয়মঃ - আসনম্ - প্রাণায়াম - প্রত্যাহারঃ - ধারণা - ধ্যানম্ - সমাধিঃ।

(18) দেহাত্মবাদ বা "চৈতন্যবিশিষ্টঃ দেহঃ এব আত্মা"
(চার্বাকদর্শন)

দেহাত্মবাদিনঃ চার্বাকাঃ, দেহাতিরিক্তঃ অন্যঃ আত্মা নাস্তি ইতি চার্বাকাঃ ~~কথয়~~ কথয়ন্তি। পৃথিবী, আপঃ, তেজঃ, বায়ুঃ - চেতি চত্বারঃ পদার্থাঃ। এতেভ্যঃ পদার্থেভ্যঃ শরীরেন্দ্রিয়বিষয়াঃ উৎপন্নাঃ ভবন্তি। বার্হস্পত্যসূত্রে উক্তং –
"চৈতন্যবিশিষ্টঃ কায়ঃ পুরুষঃ আত্মা" - ইতি, অর্থাৎ চেতনবিশিষ্টঃ দেহঃ আত্মা।

দেহাতিরিক্তে আত্মনি প্রমাণাভাবাৎ, দেহসংযোগে সতি এব আত্মনঃ উপলব্ধিঃ ভবতি। বর্তিকাতৈলয়োঃ সংযোগে সতি দীপশিখায়াঃ আবির্ভাবঃ তথৈব চতুর্ভূতস্য সংযোগাৎ চেতনস্য আবির্ভাবঃ ভবতি। অপি চ বর্তিকায়াং নষ্টায়াং সত্যাং দীপশিখাপি নশ্যতি, তথৈব দেহস্য নাশে আত্মনঃ ~~চৈতন্য~~ চৈতন্যস্য অপি নাশঃ ভবতি। অতঃ চৈতন্যত্বং দেহস্য গুণবিশেষো ভবতি।

(19) <u>অষ্টাঙ্গিকমার্গঃ (বৌদ্ধদর্শন)</u>

দুঃখস্য আত্যন্তিকনিবৃত্তেঃ উপায়ঃ এব অষ্টাঙ্গিকমার্গঃ। তে যথা - সম্যক্ দৃষ্টিঃ, সম্যক্ সংকল্পঃ, সম্যক্ বাক্, সম্যক্ কর্মান্তঃ, সম্যক্ আজীবনম্, সম্যক্ ব্যায়ামঃ, সম্যক্ স্মৃতিঃ, সম্যক্

Scanned with CamScanner

সমাধিঃ চ।

(i) <u>সম্যক্ দৃষ্টিঃ</u> - আর্যচতুষ্টয়স্য যথার্থজ্ঞানং সম্যক্ দৃষ্টিঃ।

(ii) <u>সম্যক্ সঙ্কল্পঃ</u> - সম্যক্ জ্ঞানাৎ ~~কেবলাৎ~~ মুক্তিঃ ন ভবতি। তদর্থং প্রয়োজনম্ সম্যক্ সঙ্কল্পঃ।

iii) <u>সম্যক্ বাক্</u> - মিথ্যাভাষণং ~~কটুবাক্য~~ কটুবাক্যং পরনিন্দাং চ ইত্যাদিকেম্ পরিত্যজ্য বাচঃ নিয়ন্ত্রণম্ এব সম্যক্ বাক্।

iv) <u>সম্যক্ কর্মান্তঃ</u> - সম্যক্ আচরণমেব সম্যক্ কর্মান্তঃ।

v) <u>সম্যক্ আজীবনম্</u> - হিংসাং প্রাণিহত্যাদিকং পরিত্যজ্য স্বচ্ছলং সৎজীবনযাপনমেব সম্যক্ আজীবনম্ ইতি উচ্যতে।

vi) <u>সম্যক্ ব্যায়াম</u> - দৈবচলিতভাবনাঃ মনসঃ দূরীকরণার্থং প্রয়োজনং সম্যক্ ব্যায়ামঃ।

vii) <u>সম্যক্ স্মৃতিঃ</u> - সত্যচতুষ্টয়স্য সম্যক্ জ্ঞানং সর্বদা স্মরতি চেৎ তৎ ~~স্ম~~ সম্যক্ স্মৃতিঃ।

viii) <u>সম্যক্ সমাধিঃ</u> - অষ্টাঙ্গিকমার্গস্য অন্তিমং মার্গঃ সম্যক্ সমাধিঃ।

## (২০) আর্যচতুষ্টয়ঃ / চত্বারি আর্যসত্যানি (বৌদ্ধদর্শন)

আর্যচতুষ্টয়ে বুদ্ধস্য ধর্মদর্শনয়োঃ মূলং তত্ত্বং নিহিতম্ অস্তি। চত্বারি আর্যসত্যানি ভবন্তি - দুঃখম্, দুঃখসমুদায়ঃ, দুঃখনিরোধঃ, দুঃখনিরোধমার্গঃ চেতি।

(i) <u>দুঃখম্</u> - বুদ্ধদেবস্য মতে জগৎ জীবনং চ ~~দুঃখময়~~ দুঃখময়ম্। জন্মনঃ আরভ্য মরণপর্যন্তম্ সর্বং দুঃখময়ম্।

(ii) <u>দুঃখসমুদায়ঃ</u> - দুঃখমস্তি চেৎ দুঃখস্য কারণমপি অস্তি। যস্মাৎ জগতি সর্বে বৃত্তান্তাঃ কার্যকারণশৃঙ্খলয়া আবদ্ধাঃ তস্মাৎ দুঃখম্ আকস্মিকং ন ভবতি। অবিদ্যা এব দুঃখস্য মূলং কারণম্।

Scanned with CamScanner

iii) দুঃখনিরোধঃ – দুঃখস্য মূলং কারণম্ অবিদ্যা। অবিদ্যানাশে দুঃখস্যাপি নাশো ভবতি।

iv) দুঃখনিরোধমার্গঃ – দুঃখস্য আত্যন্তিকতয়া নিবৃত্তিঃ উপায়ঃ দুঃখনিরোধমার্গঃ ভবতি।

(21) স্যাদবাদঃ বা সপ্তভঙ্গিন্যায়ঃ বা সপ্তভঙ্গীনয়ঃ বা অনেকান্তবাদী (জৈনদর্শন)

স্যাদ্বাদ জৈনদর্শনস্য অন্যতমঃ প্রসিদ্ধঃ মতবাদঃ। জৈন দর্শনম্ অনেকান্তবাদী। জৈনমতানুসারম্ বস্তুমাত্রম্ অনন্তধর্মবিশিষ্টম্। লৌকিকজ্ঞানম্ দেশকালানুগতম্ ভবতি। দেশকালানুসারম্ মনুষ্যানাং বস্তুজ্ঞানং ভিন্নম্ ভবতি।

জৈনদর্শনে অংশমাত্রজ্ঞানম্ 'স্যাৎ' নাম্না পরিচিতম্। অয়মেব হি স্যাদবাদঃ। জৈনানাং স্যাদ্বাদস্য ফলশ্রুতিঃ হি সপ্তভঙ্গীনয়ঃ। যথা – (i) স্যাদস্তি, (ii) স্যাৎ নাস্তি, (iii) স্যাৎ অস্তি চ, (iv) স্যাৎ অবক্তব্যম্, (v) স্যাৎ অস্তি চ অবক্তব্যম্, (vi) স্যাৎ নাস্তি চ অবক্তব্যম্, (vii) স্যাৎ অস্তি চ নাস্তি চ অবক্তব্যম্ চ ইতি।

(22) অলঙ্কার-সম্প্রদায়ঃ

বা "ন কান্তমপি নির্ভূষং বিভাতি বনিতাননম্।"

কাব্যস্য শরীরম্ শব্দঃ অর্থশ্চ। অস্মাকং শরীরস্য সৌন্দর্যায় যথা অস্মাভিঃ বিবিধাঃ অলঙ্কারাঃ ধ্রিয়ন্তে, তথৈব কবয়ঃ অপি তেষাম্ কাব্যশরীরস্য সৌন্দর্যায় শব্দেষু অর্থেষু চ অলঙ্কারানাম্ প্রয়োগম্ কুর্বন্তি। শব্দে যঃ অলঙ্কারঃ সঃ শব্দালঙ্কারঃ ইতি উচ্যতে, তথৈব অর্থে যঃ অলঙ্কারঃ সঃ অর্থালঙ্কারঃ ইতি উচ্যতে, অলঙ্কারঃ কাব্যস্য শোভাং বর্ধয়তি।

অলঙ্কারসম্প্রদায়স্য আদিঃ প্রবক্তা

Scanned with CamScanner

ভামালঙ্কারগ্রন্থস্য রচয়িতা ভামহঃ। অলঙ্কারস্য মাহাত্ম্যং ভামহঃ উক্তবান্ -

" ন কান্তমপি নির্ভূষম্ বিভাতি বনিতাননম্"

ইতি। অর্থাৎ যৌবনবত্যাঃ সুন্দরমপি মুখম্ অলঙ্কারম্ বিনা ন প্রকাশতে ইতি।

(23) <u>রসসম্প্রদায়ঃ</u>

বা "<u>বিভাবানুভাবব্যভিচারিসংযোগাদ্ - রসনিষ্পত্তিঃ</u>।"

সাহিত্যশাস্ত্রে সম্প্রতি উপলভ্যমানস্য রসসিদ্ধান্তস্য প্রবর্তকঃ ভরতমুনিঃ। রসস্বরূপনির্ণয়ে তেষাম্ - "বিভাবানুভাবব্যভিচারিসংযোগাদ্-রসনিষ্পত্তিঃ" ইতি সূত্রম্ প্রসিদ্ধম্। আচার্যঃ ভরতঃ নাট্যশাস্ত্রস্য ষষ্ঠে তথা সপ্তমে অধ্যায়ে রসবিষয়কসিদ্ধান্তান্ প্রতিপাদিতবান্।

আচার্যঃ ভরতঃ [illegible] নাট্যে অষ্টৌ রসান্ স্বীকৃতবান্। তে চ শৃঙ্গারঃ, হাস্যঃ, করুণঃ, বীরঃ, ভয়ানকঃ, বীভৎসঃ, রৌদ্রঃ, অদ্ভুতঃ চ।

(24) <u>বক্রোক্তিসম্প্রদায়ঃ</u>

বা '<u>শব্দার্থৌ সহিতৌ বক্রকবিব্যাপারশালিনি</u>...কারিণি"।

বক্রোক্তিসম্প্রদায়স্য প্রবর্তকঃ আচার্যঃ কুন্তকঃ। ~~তেষাম্~~ আচার্যঃ কুন্তকঃ তস্য বক্রোক্তিজীবিতম্ ইতি নামকে সাহিত্যগ্রন্থে বক্রোক্তিমেব কাব্যস্য আত্মত্বেন প্রতিপাদিতবান্। তেন উক্তম্ -

" শব্দার্থৌ সহিতৌ বক্রকবিব্যাপারশালিনি।
বন্ধে ব্যবস্থিতৌ কাব্যং তদ্বিদাহ্লাদকারিণি।"

কুন্তকস্য মতে শব্দার্থয়োঃ ~~বক্রতা~~ এব কাব্যস্য প্রাণঃ। ভামহঃ স্ব অলঙ্কারগ্রন্থে কাব্যস্য



Scanned with CamScanner

সৌন্দর্যায় উক্তবান্ –
" সৈষা সর্বত্র বক্রোক্তিরনয়ার্থো বিভাব্যতে।
যত্নোঽস্যাং কবিনা কার্যো কোঽলংকারোঽনয়া বিনা॥"

(25) <u>গুণসম্প্রদায়ঃ</u>

আচার্যঃ দণ্ডী গুণসম্প্রদায়স্য প্রবক্তা ইতি বক্তুম্ শক্যতে, যথা অলঙ্কারঃ তথৈব গুণাঃ অপি কাব্যস্য শোভাং বর্ধয়ন্তি। আচার্যঃ দণ্ডী তেষাং কাব্যাদর্শঃ ইতি নামকে গ্রন্থে গুণম্ এব কাব্যাত্মত্বেন প্রতিপাদিতবান্। তৈঃ বৈদর্ভীরীতেঃ প্রাণস্বরূপাঃ দশ গুণাঃ উল্লিখিতাঃ। তে যথা – শ্লেষঃ, প্রসাদঃ, সমতা, মাধুর্যম্, সুকুমারতা, অর্থব্যক্তি, উদারতা, ওজঃ, কান্তিঃ, সমাধিঃ চ।

(26) <u>রীতিসম্প্রদায়ঃ</u> বা '<u>রীতিরাত্মা কাব্যস্য</u>'।

আচার্যঃ বামনঃ তেষাং কাব্যালঙ্কারসূত্রবৃত্তি নামকে গ্রন্থে রীতিম্ কাব্যাত্মত্বেন প্রথমতয়া উপস্থাপিতবান্, অতঃ তে রীতিসম্প্রদায়স্য রীতিপ্রস্থানস্য বা প্রবর্তকঃ আচার্যঃ ইতি উচ্যন্তে। তথাহি তেন উক্তম্ – "রীতিরাত্মা কাব্যস্য" ইতি। কিঞ্চ রীতিঃ কা ইত্যত্র উক্তং বিশিষ্টা পদরচনা এব রীতিঃ ইতি, অর্থাৎ পদানাং যঃ বিশিষ্টঃ বিন্যাসঃ স রীতিঃ ইতি উচ্যতে।

বৈদর্ভী, গৌড়ী, পাঞ্চালী, লাটী চ ইতি চতস্রঃ রীতয়ঃ প্রসিদ্ধাঃ।

JAGANNAT MAIKAP
Guest Teacher (M.G.M)



Scanned with CamScanner

# 2nd Semester Sanskrit (Hons.) 2020

**paper → CC3**

~~Suggestion~~

Suggestion - 2020

## Sec-A → বৈদিক সাহিত্য

১) বেদাঙ্গ বলতে কী বোঝো? বেদাঙ্গ কয়টি ও কী কী? সেগুলি সম্পর্কে সংক্ষেপে আলোচনা করো?

২) ব্রাহ্মণ সাহিত্য সম্পর্কে সংক্ষেপে আলোচনা করো?

৩) ঋগ্বেদের কাল নির্ণয় করো?

৪) ঋগ্বেদের বিষয়বস্তু আলোচনা করো? xe.

৫) যজুর্বেদের বিষয়বস্তু আলোচনা করো?

৬) বৈদিকযুগে নারীর স্থান?

7) ছোটপ্রশ্ন -

## Sec-B → রামায়ণ

১) রামায়ণের রচনাকাল সম্পর্কে আলোচনা করো?

২) রামায়ণের সাহিত্য সমাজে প্রভাব আলোচনা করো?

৩) রামায়ণের প্রক্ষিপ্ত অংশ সম্পর্কে আলোচনা করো?

4) ছোটপ্রশ্ন ⇒ khata/xerox

## Sec-C → মহাভারত

১) মহাভারতের রচনাকাল সম্পর্কে আলোচনা করো?

২) রামায়ণ ও মহাভারতের পৌর্বাপর্য আলোচনা করো? xe.

3) ছোটপ্রশ্ন - xe

## Sec-D → পুরাণ

১) পুরাণ বলতে কী বোঝো? কয়প্রকার ও কী কী? পুরাণের লক্ষণ বা বৈশিষ্ট্য সম্পর্কে আলোচনা করো?

২) সমাজ ও সাহিত্যে পুরাণের ঐতিহাসিক গুরুত্ব আলোচনা করো? (xe.)

3) ছোটপ্রশ্ন - xe.

## Sec-E → ব্যাকরণ, দর্শন ও সাহিত্যশাস্ত্র

১) ভারতীয় দর্শন সম্প্রদায়ের বৈশিষ্ট্যগুলি আলোচনা করো?

২) "চৈতন্যবিশিষ্ট দেহই আত্মা" — উক্তিটির তাৎপর্য বিশ্লেষণ করো?

3)

4)

5)

Scanned with CamScanner

৬) ব্যাকরণ

## টীকা

১) পুরাণের লক্ষণ
২) উপনিষদ
৩) বেদাঙ্গ
৪) শতপথ ব্রাহ্মণ
৫) ঐতরেয় ব্রাহ্মণ
৬) আরণ্যক
৭) সর্বানুক্রমণী
৮) বৃহদ্দেবতা
৯) ব্যাকরণ
১০) শিক্ষা
১১) নিরুক্ত
১২) শ্রীমদ্ভগবদ্গীতা
১৩) হরিবংশ
১৪) অগ্নিপুরাণ
১৫) মৎস্যপুরাণ
১৬) বিষ্ণুপুরাণ
১৭) অষ্টাধ্যায়ী — পাণিনি
১৮) মহাভাষ্য — পতঞ্জলি
১৯) আত্মতত্ত্বম্ (B/১)
২০) অষ্টাঙ্গিক মার্গ (B/১)
২১) স্যাদ্বাদ (১)
২২) সৎকার্যবাদ (B/১)
২৩) চৈতন্যবিশিষ্ট দেহই আত্মা / দেহাত্মবাদ (১)
২৪) মহাভারতের পর্ব
২৫) রামায়ণের কাণ্ড
২৬) পুরাণের শ্রেণিবিভাগ
২৭) অষ্টাঙ্গযোগ (১)
২৮) রীতিসম্প্রদায় (১)
২৯) রসসম্প্রদায় (১)
৩০) বক্রোক্তিসম্প্রদায় (১)
৩১) সপ্তভঙ্গি নয়
৩২) অলংকারসম্প্রদায় (১)
৩৩) ধ্বনিসম্প্রদায় (১)
34) আস্তিক দর্শন